वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

# अप्रकाशितदृष्टान्तशतकपाण्डुलिपिः - विवरणात्मकः परिचयः।

**सौ. भारती विजय कोळेकर**[१]

**प्रो. डॉ. नन्दा पुरी**[२]

न्यू कॅटलोगस् कॅटलोगरम् इति हस्तलिखितग्रन्थानां विवरणात्मकपरिगणनासूच्याः[३] तथैव पाण्डुलिपिभाण्डागारीयविवरणात्मकानुक्रमणिकासूचिभ्यः[४] **'दृष्टान्तशतकम्'** नाम्नः काव्यग्रन्थस्य नामसाधर्म्ययुक्तहस्तलिखितान्यधिकृत्य यद्सूचनमुपलब्धं तद् वैशिष्ट्यपूर्णमिति प्रत्यभात्। तस्मात् वडोदरास्थित-महाराजा-सयाजि-गायकवाड-विश्वविद्यालयस्य प्राच्यविद्या-संशोधन-संस्थायाः ग्रन्थागारात् उपलब्धस्य 'दृष्टान्तशतकम्' इत्यस्य हस्तलिखितस्य स्थूलाध्ययनं कृतम्। तथा च भाण्डारकर-प्राच्य-विद्या-संशोधन-संस्थायाः ग्रन्थागारादुपलब्धभूतं 'दृष्टान्तशतकमि'ति अन्यप्रतिहस्तलेखद्वयस्यापि स्थूलाध्ययनं कृतम्। स्थूलाध्ययनानुषङ्गेन अन्य हस्तलिखित-सङ्ग्रहालयानाञ्च ग्रन्थविवरणसूचीनिदर्शनात् प्राप्तमुख्यांशाः -

---

१ अनुसन्धात्री, कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः, रामटेकं, नागपूरं, महाराष्ट्रम्।

२ मार्गदर्शिका, कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः, रामटेकं, नागपूरं, महाराष्ट्रम्।

३ NCC - Vol 9; Pg. 98a, 98b and 99a

४ क) भाण्डारकर प्राच्य-विद्या-संशोधन-संस्था, पुणे. (ignca.gov.in/mss/mah_BORI_02.pdf, Pg 701)

ख) मैसूरु राजकीय प्राच्यकोशागारस्थ लिखित संस्कृतपुस्तकप्रदर्शिनी - पृ. क्र. २४७;

ग) An Alphabetical List of Manuscripts In The Oriental Institute Baroda - Vol 3a-Pg 92; - Vol 4C-Pg 92

१. 'दृष्टान्तशतकमि'ति कुसुमदेवविरचितः काव्यग्रन्थः। विविधहस्तलिखितग्रन्थागारीयविवरण-परिगणनासूचीषु विद्यमानस्यास्य हस्तलिखितस्य विवरणं दृष्ट्वा 'दृष्टान्तशतकं' 'दृष्टान्तकलिकाशतक'श्चेति नामभिन्नता विद्यमानेयं पाण्डुलिपिरिति ज्ञायते। प्रकाशितोऽयं ग्रन्थः इत्यपि उल्लेखः प्राप्यते।[५]

२. 'दृष्टान्तशतकम्' इत्येव शीर्षकयुक्तं जैनौपदेशिकम् एकमन्यद्धस्तलिखितं वर्तते। एतद् श्रीतेजसिङ्घगणिना विरचितमस्ति। विविधेषु पाण्डुलिपिग्रन्थालयेषु विद्यमानविवरणसूचीषु ग्रन्थस्यैतस्य हस्तलिखितप्रतयः उपलब्धाः इति उल्लेखो वर्तते। अयं ग्रन्थः १९४४ ख्रिस्ताब्दात् प्रागेव गुजरातीभाषया भाषान्तरेण सह प्रकाशितः इत्यप्युल्लेखः[६] प्राप्यते।

३. अन्यासां हस्तलिखितप्रतिकृतीनां विवरणपत्रे 'दृष्टान्तशतकम्' अस्य ग्रन्थस्य कर्ता **केशवः** अस्तीति लिखितं दृश्यते। परन्तु तस्याः प्रतिहस्तलिखितप्रतिकृतेः पुष्पिकाध्ययनात् ज्ञायते यत् प्रतिपाण्डुलिपिप्रतिरियं श्रीतेजसिङ्घगणिना विरचितग्रन्थपाठमनुकरोति तथा च गुरुशिष्यपरम्परानुसारेण केशवः श्रीतेजसिङ्घस्य गुरुर्भवति।

४. 'दृष्टान्तशतकम्' इत्येव शीर्षकयुक्ता नरेन्द्रसूरिविरचिता सर्वथा भिन्ना ग्रन्थरचनापि उपलब्धा अस्ति। हस्तलिखितस्यैतस्य उपलब्धतायाः नामनिर्देशः कस्यांश्चिदेव ग्रन्थागारविवरणसूच्यां[७] कृतोऽस्ति। अस्य ग्रन्थस्य प्रकाशनविषयकोल्लेखः हस्तलिपिविवरणात्मकसूचिषु वा प्रकाशितपुस्तकसूचीषु वा लेखपुस्तिकादिषु वा न दृष्टः।

५. कुसुमदेव-तेजसिङ्घ-नरेन्द्रसूरिविरचितोपरोक्तग्रन्थत्रये केवलं नामसादृश्यता दृश्यते किन्तु एतेषां त्रयाणां ग्रन्थानां मूलपाठस्था मिथः पाठभिन्नतैव विशेषत्वेन एताः प्रतिपाण्डुलिपिप्रतीः पृथक्करोति।

---

[५] च) NCC - Vol 9; Pg. 98a, 98b and 99a;

छ) Catalogues Catalogorum - Part I Pg. 258a;

ज) Catalogue of The Library of The India Office; Vol II-Part I Pg 790

[६] अ) NCC - Vol 9; Pg. 98a, 98b and 99a;

आ) जिनरत्नकोशः। (ग्रन्थविभागः प्रथमः - पृ. क्र. १७७अ)

[७] प) तथैव;

फ) भाण्डारकर प्राच्य-विद्या-संशोधन-संस्था, पुणे.

(ignca.gov.in/mss/mah_BORI_02.pdf, Pg 701)

नीतिशतकं, शृङ्गारशतकं, वैराग्यशतकं इत्येतानि शीर्षकाण्युपयुज्य अन्यरचनाकारैः ग्रन्थाः विरचिताः सन्ति। तथापि शतकत्रयमित्युक्ते सामान्यतः भर्तृहरिविरचित-नीतिशृङ्गारवैराग्यशतकं चेति एताः एव रचनाः स्मर्यन्ते। तथैव शीर्षकसाम्यं विद्यमानाः अपि तु भिन्नकर्तृकत्वं लब्धाः अन्यग्रन्थरचनाः संस्कृतसाहित्ये दृश्यन्ते। तादृशी दृष्टान्तशतकग्रन्थरचना तास्वेकेति परिगणितव्या भवति। अन्याः अपि नैकाः सन्ति। किन्तु प्रस्तुतपत्रस्य नैतद्वर्ण्यविषयः। तस्मात् तासां रचनानाम् उल्लेखः बुद्धिपूर्वकमेवात्र वर्जितः।

उपरि निर्दिष्टेषु दृष्टान्तशतकस्य हस्तलिखितेषु वर्ण्यविषयेष्वन्योन्यसाधर्म्यसम्बन्धः न दृश्यते। चतुर्थबिन्दौ उक्तग्र थस्यास्य अप्रकाशितत्वात् इमं दृष्टान्तशतकग्रन्थमधिकृत्यैव विवरणात्मकः परिचयः अत्र दातव्यः यतः स एव अस्य संशोधनपत्रस्य विषयः।

प्रस्तुतलेखे नरेन्द्रसूरिविरचितं दृष्टान्तशतकग्रन्थमधिकृत्यैव मातृकायाः बहिरङ्गपरिचयोऽत्राकारि।

## १. नरेन्द्रसूरिविरचितं 'दृष्टान्तशतकम्' पाण्डुलेखः -

### i) बहिरङ्गविवरणम् -

डॉ. आर. जी. भाण्डारकरमहोदयेन समर्पितं षष्ठं प्रतिवेदनं यत् १८८७-९१ कालावधेः सङ्ग्रहः इति परिज्ञायते, तस्मिन् सङ्ग्रहे १३७३ इत्युपागमक्रमाङ्कं वहन्ती **'दृष्टान्तशतक-सावचूरि'** इत्याख्या प्रतिहस्तलिपिप्रतिकृतिः भाण्डारकर-प्राच्य-विद्या-संशोधन-संस्थायां सुसंरक्ष्य स्थापिता विद्यते। पुस्तिका इयं चतस्रः (4 Folio) पत्रात्मिका नाम अष्टौ (4R+4V) पृष्ठात्मिकाऽऽस्ति। कर्गजनिर्मितायाः अस्याः पत्रायामो दैर्घ्यं २६ सेमि. परिमितं प्रस्थः ११ सेमि. परिमितश्च विद्यते। पञ्चपङ्क्तियुक्तम् अन्तिमं पृष्ठं विहाय प्रतिपृष्ठं मूलपाठस्य त्रयोदशपङ्क्तयः, प्रतिपङ्क्ति न्यूनातिन्यूनात् पञ्चत्रिंशत्(३५)तः अधिकाधिकं सप्तचत्वारिंशत् (४७) अक्षरसङ्ख्या तथैव अन्तिमे पृष्ठे न्यूनातिन्यूनात् चतुर्विंशतिः(२४)तः अधिकाधिकं सप्तत्रिंशदिति(३७) अक्षरसङ्ख्यायुता परिपूर्णेयं पुस्तिका।

सम्पूर्णपत्रस्योपयोगः सम्यकतया कृतोऽस्तीति दर्शनमात्रेण कथयितुं शक्यते। अन्तिमपृष्ठस्यार्धभागे शून्यस्थानं दृश्यते। प्रतिहस्तलिप्यां मध्यभागे मूलपाठः लिखितः वर्तते। एनं मूलपाठं परितश्च विभागचतुष्टये मनोहरसूक्ष्माक्षरदेवनागरीलिप्याम् अवचूरिः लिखिता वर्तते।

वामदक्षिणभागयोः विद्यमाने अवचूरी पाठं परितः कृतरेखाद्वयालेखनेन पृथक्कृते वर्तेते। एवं रीत्या पञ्चविभागेषु विभज्य कृतलेखनप्रतिः पञ्चपाठा[८] पुस्तिका इति उच्यते। अस्यां कृष्णवर्णमस्या पाठलेखनं कृतमस्ति। रिक्तस्थलरक्षणाय अक्षरलेखनयेव स्वकौशलेन लिपिकर्त्रा विशिष्टशैल्या  एतादृशी चित्राकृतिः आरचितेति दृश्यते। प्रतिपृष्ठं वामदक्षिणभागस्थावचूर्यां द्वे आकृती, मूलपाठस्य मध्यभागे एकाऽऽकृतिः तथा अधोलिखितावचूर्याम् अर्धाकृतिः इति सार्धत्रयचित्राकृतिसुशोभितेयं पुस्तिका। पत्रबिम्बग्राहकयन्त्र(scanner)मुद्रितेयं प्रतिलिपिः सुखपाठा विद्यते। मूलपाठश्च अवचूरिश्च देवनागरीलिप्याक्षरैः संस्कृतभाषायां लिखिते वर्तेते। कर्गजस्य जीर्णशीर्णत्वात् नष्टाक्षरायाः पत्रप्रान्तस्थलिखितावचूर्याः अवबोधनं यद्यपि सम्यकतया न भवति तर्हि अनुमानेन तत्सम्भवति। ऊर्ध्वमात्रायाः तथा च पृष्ठिमात्रायाः[९] अप्युपयोगः लेखने दृश्यते।

पत्रस्य दक्षिणतः अधःभागे पङ्क्त्यक्षरैः आरचितचतुष्कोणे पत्राङ्काः लिखिताः दृश्यन्ते। टबालेखनार्थमुपयोजितवर्णाक्षराणि मूलपाठलेखनार्थमुपयोजितानां वर्णाक्षराणामपेक्षया लघ्वाकाराणि। कुत्रचित् अस्पष्टानि तेनैव न सुपाठ्यानि। दृष्टान्तशतकम् इदं कदा केन च लिपिबद्धं कृतं तन्न ज्ञायते।

अस्य दृष्टान्तशतकस्यारम्भः अधोदत्ताद्यांशेन भवति।

**आद्यांशः** - प्रणिपत्य परं ज्योतिर्नानाभणितभङ्गिभिः। श्लोकैरेव यथाशक्ति सूक्तमालां वितन्महे॥१॥

कलाकलापसम्पन्ना जल्पन्ति समये परम्। घनागमविपर्यासे केकायन्ते न केकिनः॥२॥

उपकर्ता स्वतः कश्चिदपकर्ता च कश्चन। चैत्रस्तरुषु पत्राणां कर्ता हर्ता च फाल्गुनः॥३॥

कल्याणमूर्तिस्तेजांसि सम्पद्यन्ते विपद्यपि। किं वर्णिका सुवर्णस्य नारोहति हुताशने॥४॥

दधत्यार्त्तं सुखी कर्तुं सन्तः सन्तापमात्मना। सुदुःसहं सहन्ते हि तरवस्तपनातपम्॥५॥

**मध्यांशः** - न ज्ञाते यमुपादेयं गुणैः सम्पद्यते पदम्। रवेर्व्यापारमादत्ते प्रदीपो न पुनः शनिः॥५४॥

सर्वेषां??पास्यो यः सो(ऽ)पि कैश्चिदुपास्यते। प्रसह्य मृज्यतेऽन्यत्र नेत्रयोः पूज्यमञ्जनम्॥५५॥

---

[८] भारतीय श्रमण संस्कृति अने लेखनकला, पृ.क्र. ७३

[९] तथैव, पृ.क्र. ४९-५०

स्त्रीणां दोहदमन्वेति प्रसूतिरिति गीर्मृषा। केतक्याः प्रसवः सोऽयमलमालप्य दोहदम्॥५६॥

अभ्यागारिकमभ्येति नात्मम्भरि अयं जनः। विहाय वाडवं लोके अम्बोधिं के न गम्यते॥५७॥

जङ्घालत्वं जघन्यानामुन्मार्ग्रेण निसर्ग्रतः। तिमिपोतः प्रतिश्रोतः पथे न पथिकः परम्॥५८॥

**अन्तिमांशः -** भद्रमाशास्महे तस्मै यः स्यान्मौनी गुणाधिकः। कः किल स्तौति काकोलं वाचालं सति कोकिले॥११७॥

त्वमात्मा न प्रविष्टेभ्यः सद्यादद्यात्समुन्नतिम्। दुनोत्यस्मान् लघून् कुर्वन् दर्पणोऽप्यर्पितात्मनः॥११८॥

किमप्यसाध्यं महतां सिद्धिमेति लघीयसः। प्रदीपो हेमगेहान्तध्वान्तं हन्ति न भानुमान्॥११९॥

विस्तीर्णे ऊर्णनाभस्य सर्वदिक्व्यापिभिर्गुणैः। अन्तं जन्तुगुणो नीतः कियत् क्षुद्रस्य सुन्दरम्॥१२०॥

भोग्यान् विशिष्यते वस्तु यत्प्राप्ते न्यस्तमात्मना। पयः पीयूषमब्दे तु वारिधेर्विषमात्मनि॥१२१॥

**पुष्पिका -** इति श्री**मलधारिश्रीनरेंद्रप्रभ**विरचितं दृष्टान्तशतं समाप्तम्॥ ॥छ॥ ॥छ॥

**ii) अन्तरङ्गविवरणम् -**

ग्रन्थारम्भः मङ्गलाचरणेन भवितुमर्हतीति। दृष्टान्तशतकस्यारम्भे रचनायाः निर्विघ्नपरिसमाप्तिरूपिण्यै अभिष्टसिद्धये ग्रन्थकर्ता *'प्रणिपत्य परं ज्योतिर्नानाभणितभङ्गिभिः। श्लोकैरेव यथाशक्ति सूक्तमालां वितन्महे॥'* - अनेन पद्येन अस्य विधितस्य विधानमत्र मङ्गलमाचरति। ज्योतिः नाम तेजस्। तस्मात् परस्मै तेजसे नमस्कृत्य विविधविधवचोसुमनिबद्धश्लोकसूक्तमाला गुम्फिता वर्तते अस्मिन् दृष्टान्तशतके।

दृष्टान्तशतकम् इत्यस्मिन् शीर्षके विद्यमानशब्दद्वयात् काव्यमिदं दृष्टान्तालङ्कारैः युक्तं शतपद्यपरिमितं भवतीति ज्ञायते। तर्हि काव्यमिदम् एकविंशत्यधिकं शतं(१२१)पद्यैर्युक्तमस्ति। सर्वाणि पद्यानि अनुष्टुभि छन्दसि विरचितानि वर्तन्ते। सरलगम्यान् विषयान् आधारीकृत्य कृतसमर्पकविवेचनञ्च दत्तदृष्टान्तश्च एतद्वयोः पद्यात् स्पष्टीभूतपरस्परसम्बन्धस्य सुगमतया आकलनं भवति।

यथा .........

**स्थानमहिमा** - स्थानोपज्ञं विदुः स्थाने महिमानं मनीषिणः। देवशीर्षेषु शेषेषु माल्यं निर्माल्यमन्यथा॥

अलंकारो(ऽ)प्यलंकर्तुमलं स्थाने नियोजितः। श्रियं तारस्रजः कंठे दधते न तु पादयोः॥

**सज्जनस्वभावः** - दधत्यार्त्तं सुखी कर्तुं सन्तः सन्तापमात्मना। सुदुःसहं सहन्ते हि तरवस्तपनातपम्॥

**सङ्गतिविपरिणामः** - सङ्गतिर्यादृशी तादृक् ख्यातिरायाति वस्तुनः।
रजनि र्ज्योत्स्नया ज्योत्स्ना तमसा च तमस्विनी॥

**दुर्जनप्रवृत्तिः** - निजव्यापारनिश्चिन्ता निद्रायन्ते भुजङ्गमाः। जगद्रोहप्ररोहाय यतो जागर्त्ति दुर्जनः॥

**पुण्यप्रभावः** - सुकृते सर्वतः क्षीणे श्रीरपि क्षीयते क्षणात्। पाथःपूरे तथा शोषे किं नन्दत्यरविन्दिनी॥

भवेत् प्रभुत्वं पुण्येन न हिरण्येन जातुचित्। अद्रिराजस्तुषाराद्रि न पुनः कनकाचलः॥

**ऐश्वर्यसार्थकता** - श्रीमन्तमुपतिष्ठन्ते नैव निर्धनमर्थिनः। वानस्पत्यान् परित्यज्य भजन्ते केऽवकेशिनः॥

सदा सर्वजनैर्भोग्यं श्लाघ्यं भवति वैभवम्। सुखपेयं पयःपूरं वरं कूपात् सरोवरम्॥

**औदार्यस्तुतिः** - अस्तिमानं च कः स्तौति वदान्यो नैव चेन्नरः। रम्यापि केन रम्येत युवतिर्यदि दुर्भगा॥

**स्वभावदार्ढ्यम्** - नह्येके व्यसनोद्रेकेऽप्याद्रियन्ते विपर्ययम्। जहाति दह्यमानोऽपि धनसारो न सौरभम्॥

दुःसङ्गेनापि नापैति सतां स्वाभाविको गुणः।
विषेण सह वास्तव्यो जीवातुः फणिना मणिः॥

इत्यादिभिः विषयैः सहैव चारुसुगन्धयुक्तस्तु फलहीनचन्दनस्य उदाहरणेन ऐश्वर्यस्यापेक्षया **गुणश्रेष्ठत्वं** स्पष्टीकृतम्। प्रतिकूलपरिस्थिता अपि अस्माकं व्यवहारे वैषम्यं न स्यातदिति विचारो

प्रकटीकृतोऽस्ति। तरुषु नवपल्लवागमः तथा तरुपत्रविगलनमेतादृशीं नैसर्गिकीप्रक्रियां सरलभावेन प्रस्तुतीकृत्य जगत्यस्मिन् यत्र कोऽप्युपकर्तृरूपेण विद्यमानोऽस्ति तत्र कश्चिदपकर्तापि भवत्येव एतत्स्पष्टीकृतम्। इत्येवं प्रकारेण **क्रूरस्वामिस्वभावपरिणतिः**, **मूर्खस्वभावपरिणामः**, **बुधजनस्वभावकौशलं**, **प्रभुकृपाफलं**, **लोकरूढिमान्यता**, **सच्चरित**मादीनपि विविधविषयान् आधारीकृत्य रचितानि पद्यानि अस्मिन् शतके दृश्यन्ते।

ग्रन्थस्थानां सर्वासां पद्यपङ्क्तीनामर्थः संस्कृतभाषायामेव विद्यमानायामवचूर्यां दत्तोऽस्ति। तत्र यथा उपरिदत्ताद्यांशे विद्यमानप्रथमपद्यस्यावचूरिः - ॥प्रणिपत्य०। वयं सूक्तमालां सुभाषितश्रेणिं वितन्महे। श्लोकैरेव। यथा शक्ति। शक्तिं यथा स्यात्। तथा विस्तारयामि। किं कृत्वा। परं प्रकृष्टं ज्योतिस्तेजः प्रणिपत्य नत्वा। किं देवश्लोकैः नानाभणितभङ्गिभिः विचित्रवचनविच्छित्तिभिः॥१॥

ग्रन्थपुष्पिकातः दृष्टान्तशतकमिदं श्री**मलधारिश्रीनरेन्द्रप्रभ**विरचितमस्तीति ज्ञायते। अलङ्कारमहोदधिः इत्यन्यैकस्याः ग्रन्थरचनायाः कर्तापि श्रीमलधारिनरेन्द्रप्रभसूरिरेव इति उल्लेखो विद्यते। अलङ्कारमहोदधिकर्त्रा विरचितासु अन्यकृतिषु विवेककलिका, विवेकपादपः इति नाम्ना जैनधार्मिक तथा दार्शनिकविषयाणां सङ्ग्रहद्वयं, काकुत्स्थकेलि नामकं १५०० श्लोकपरिमितं एकं नाटकं तथैव वस्तुपालप्रशस्तिद्वयम् इति कृतयः निर्दिष्टाः सन्ति। अत्र कुत्रापि दृष्टान्तशतकस्योल्लेखः न कृतः। किन्तु अलङ्कारमहोदधिग्रन्थस्याष्टमतरङ्गे दृष्टान्तालङ्कारं स्पष्टीकर्तुम् उदाहृतं गृहीतपद्यपङ्क्तिद्वयं दृष्टान्तशतकग्रन्थे दृश्यते। अलङ्कारमहोदधिकर्ता यः हर्षपुरीय गच्छाधिपतिसूरिपरम्परायाः आचार्यनरचन्द्रसूरिणां शिष्यः सः एव नरेन्द्रप्रभसूरिः दृष्टान्तशतकग्रन्थस्यास्य कर्ता स्यात् तर्हि अलङ्कारमहोदधिग्रन्थात् प्राप्तसूचना[१०]नुसारं नरेन्द्रप्रभसूरिणा विरचितदृष्टान्तशतकस्य रचनाकालः वि.सं. द्वादशशतकस्योत्तरार्धतः वि.सं. त्रयोदशशतकस्य पूर्वार्धम् एतावत् भवितुमर्हति इति वक्तुं शक्यते।

पत्रान्ते भिन्नकर्तृकत्त्वस्य दृष्टान्तशतकमित्येव नाम्नः लब्धग्रन्थद्वयस्याद्यन्तिमांशपद्यपङ्क्तयः भेदपरिचयार्थं प्रस्तुताः।

### २. कुसुमदेवविरचितं 'दृष्टान्तशतकम्' -

**आद्यांशः** - शिवस्मरणमेवैकं संसारान्तकनाशनं।घनौघो घोरदावाग्निनिर्वापणपटुर्भवेत्॥१॥

---

[१०] नरेन्द्रप्रभसूरिनिर्मितः स्वोपज्ञविवरणसमेतः अलङ्कारमहोदधिः - प्रस्तावना

साधुरेव प्रवीणः स्यात्सद्गुणामृतवर्णने। नवचूताङ्कुरास्वादकुशलः कोकिलः किल॥२॥

**अन्तिमांशः** - कालक्रमेण परिणामवशादनर्घा भावा भवन्ति खलु पूर्वमतीव तुच्छाः।

मुक्तामणिर्जलदतोयकणोऽप्यणीयान् सम्पत्स्यते सुखरकीचकरन्ध्रमध्ये॥९९॥

इयं कुसुमदेवेन कविनैकेन निर्मिता। दृष्टान्तकलिका नाम जृम्भतां कविमानसे॥१००॥

**पुष्पिका** - इति कुसुमदेवरचितं दृष्टान्तशतकं सम्पूर्णम्।

**३. तेजसिङ्घविरचितं 'दृष्टान्तशतकम्'**

**आद्यांशः** - नत्वा श्रीऋषभं सदा वृषधरं सौख्याकरं सुन्दरं,

देवेन्द्रादिनतं मुनीन्द्रमहितं पौरस्त्यतीर्थङ्करम्।

श्रोतृणां प्रतिबोधकं सुखकरं दृष्टान्तकानामहं,

कुर्वे काव्यशतं निजाऽपरनृणां व्याख्यानसद्धेतवे॥१॥

**अन्तिमांशः** - तस्थौ हस्तचकोरभृच्च तृषितो वृक्षाश्रयेऽहेर्मुखा-

त्त्रोर्ध्वादपतद्गरं नृपतिना नीरेच्छयाऽऽत्तं करे।

तद्दूरीकृतमभ्रगेण स परं क्रोधेन वै मारितो,

भूपस्तत्तदनूरगश्च पतितः खेदन्तु दृष्ट्वाऽकरोत्॥१०१॥

**पुष्पिका** - श्रीलुङ्काख्यगणे गणीश्वरगुरूकेशवां स्थित-

शिष्येणाऽऽशुकृतं वरं निजधिया दृष्टान्तकानां शतम्।

छन्दोऽलङ्कृतिशब्दशास्त्ररहितं काव्यं यदा निर्मितं,

तत्सर्वं हि कृपां विधाय मयि भोः धीरैर्विशोध्यं वरैः॥१०२॥

॥इति श्रीदृष्टान्तशतकं समाप्तम्॥

नरेन्द्रप्रभसूरिणा विरचितदृष्टान्तशतककाव्य[११]स्यास्य भाषान्तरेण प्रकाशनं भवति चेत् सहृदयपाठकाः तत्रगतानां दृष्टान्तानां उदाहरणान् अभ्यसयेयुः पाठपरिचिताश्च भवेयुः। तथैव अन्यदृष्टान्तशतकद्वेन सह तुलनात्मकम् अध्ययनञ्चापि तेषां शक्यं भवेत्।

## सन्दर्भग्रन्थसूचिः


1) BRAHMCHARI, U., & PRAJAPATI, S. (Eds.). (2008). *AN ALPHABETICAL LIST OF MANUSCRIPTS IN THE ORIENTAL INSTITUTE VADODARA* (FIRST ed., Vol. IV). ORIENTAL INSTITUTE, MAHARAJA SAYAJIRAO UNIVERSITYOF BARODA, VADODARA.

2) Monier-Williams, S. M. (1956 Edition). *A Saṃskṛta - English Dictionary.* Oxford: Oxford University Press.

3) Nanavati, R. I. (Ed.). (n.d.). *AN ALPHABETICAL LIST OF MANUSCRIPTS IN THE ORIENTAL INSTITUTE, BARODA, Gaekwad's Oriental Series No. 178* (Vols. III-A). Maharaja Sayajirao University of Baroda, Vadodara.

4) Natha, P., & Chaudhuri, J. B. (1938). *CATALOGUE OF THE LIBRARY OF THE INDIA OFFICE, Sanskrit Books, Section I (A-G)* (Revised ed., Vols. II, Part I, Section I(A-G)). London: His Majesty’s Stationary Office.

5) Raja, D. K. (1977). *New Catalogus Catalogorum* (Vol. 9). Madras.


[११] प्रतिपाण्डुलिपिप्रतेः प्राप्त्यर्थं पुण्यपत्तनस्था-भाण्डारकर-प्राच्यविद्या-संशोधनसंस्थायाः व्यवस्थापकः डॉ. श्रीनन्द बापटमहोदयेभ्यः, कार्तज्ञता निवेद्यते।

6) Shah, A. (Ed.). (n.d.). *CATALOGUE OF SANSKRIT AND PRAKRIT MANUSCRIPTS* (Vol. Part II). Ahmedabad-9: Lalbhai Dalpatbhai, Bharatiya Sanskriti Vidyamandir.

7) Velankar, H. D. (1944). *JINARATNAKOSA - An Alphabetical Register of Jain Works and Authors* (Vol. I). Poona, India: Bhandarkar Oriental Research Institute.

8) *भारतीय श्रमण संस्कृति अने लेखनकला.* (n.d.).

9) *मैसूरु राजकीय प्राच्यकोशागारस्थ लिखित संस्कृतपुस्तकप्रदर्शिनी .* (n.d.).

10) लालचन्द्रः भगवानदासः गान्धिः. (१९४२). *नरेन्द्रप्रभसूरिनिर्मितः स्वोपज्ञविवरणसमेतः अलङ्कारमहोदधिः.* (ब. भट्टाचार्यः, Ed.) बरोडा: प्राच्यविद्यामन्दिर,.

11) *संस्कृत-शब्दार्थ-कौस्तुभ.* (n.d.).